IJAER/September-October 2018 /Volume-7/Issue-2 ISSN : 2278-9677
International Journal of Arts & Education Research

# संस्कृतभाषायाः समृद्धसाहित्यम्

**डॉ. हंसराज गुप्ता**
सहायक आचार्य, संस्कृतवाङ्मयम्
राजकीय विट्ठलनाथ सदाशिव पाठक
आचार्य संस्कृत महाविद्यालय, कोटा (राज.)

**सारांशः**

मानवस्य हृदयगतभावान् प्रकाशयितुं भाषा एव माध्यमरूपेण मानवसृष्टौ समुत्पन्ना वर्तते। भाषायाः सम्पत्तिः भवति साहित्यम्। साहित्यमवाप्य भाषा दीर्घजीवनं लभते। अस्मिन् जगतितले संस्कृतभाषायाः साहित्यं सुसमृद्धं वर्तते एतस्मादेव एषा भाषा ख्यातिमापन्ना लोकोपकारिणी संस्कारसम्पन्ना सर्वजनहितसम्पादयित्री च वर्तते। सर्वादौ प्रचलिताया एतस्या आर्यभाषायाः साहित्यसमुन्मीलितं रूपं वर्तते। अनादितः प्रचलिता देववाणीति नाम्ना प्रसिद्धा प्राचीनाम् आर्याणाम् भाषा एव सुशृंखलता–स्थायिता–सुन्दरताद्यापादकानां व्याकरणसंस्काराणां शनैःशनैः दृढ़ीभावात् 'संस्कृतम्' इति नामधेयम् लेभे।

**यस्याः भाषायाः पार्श्वे यावन्मात्रायां** शब्दरूपं नीवीधनं भवति सा भाषा तावन्मात्रायामेव साहित्यादिना समृद्धा भवति। साहित्यं भाषायाः सम्पत्तिः, समाजस्य जीवनं जनतायाः सभ्यतासरणिः वर्तते। साहित्यमेव भाषायाः जीवनदैर्ध्यम्। भाषायाः साहित्यस्य प्रभावेण चमत्कारेण वा प्रभावान्विताः जनाः तस्याः भाषायाः अनुरागिणः भवन्ति, तस्मिन् साहित्ये चमत्कारकेण प्रयुक्ता भाषा पाठकान् प्रीणयति अनुरञ्जयति वा। यस्याः भाषायाः यावत्समृद्धः शब्दकोषः समपेक्षिता च धातुसमृद्धिः भवति सा भाषा तावदेव ख्यातिमापन्ना भवति। यत्र भाषायां शब्ददारिद्रयं भवति तत्र प्रमेयस्य प्रतिपादनं परिमित–प्रकारेण भवति अतः चमत्कारिता न प्रतिपाद्यते। अत्र स्पष्टमेव यत् संस्कृतभाषा एव तादृशी भाषा वर्तते यत्र उल्लिखिताः समस्ताः गुणाः समाविष्टाः सन्ति। अस्य समृद्धसाहित्यस्य विषये प्राप्यते।

**1. वेदाः –** यदा संसारे जनाः भोजनशयनादि सृष्टिधर्मे युक्ताः स्वजीवनं सामान्यरूपेण यापयन्तः आसन् तस्मिन् समये अस्मांक देशे ज्ञानविज्ञानादिना समृद्धकोषसाहित्यस्य भण्डारः संस्कृतभाषायाम् आसीत्। तत्रापि सर्वप्रथमः दिव्यज्ञाननिधिः वेदानां महत्वं तु गरिमागौरवेण समादृतम् आसीत्। ''अपौरूषेयाः वेदाः''

अर्थात् परमात्मा एव रचयिता येषां तेभ्यः निसृताः ज्ञाननिधिः सर्वेषु मानवेषु सभ्यतां स्थापयित्वा आदर्शजीवनं यापनाय अनुशासयति। ते वेदा एव अस्याः भाषायाः चतुर्दिक्षु प्रकाशिताः चत्वारो विजयध्वजरूपाः अभवन्। तेषां वेदानां ज्ञानगरिमागौरवस्य प्राचीनता विषये महामहापण्डितानामनेकानि मस्तिष्काणि बहुकालाद् गवेषणाप्रयत्ने संलग्नानि सन्ति, परं अद्यावधेरपि पुनःपुनः मथनात् नूतनत्वे नवनीतं प्राप्यते न तु समाप्तिर्भवति अतः अपारज्ञानराशेः महोदधिरयम्। **उक्तम्**

**यैरादौ भुवनेषु पावनतमं तज्ज्योतिराविष्कृतं**
**यस्याग्रे स्वयमेव सर्वजगतां मूर्द्धा नतो जायते**
**सर्वस्यौषधयः प्रबोधनिधयः पीयूषपाथोधयः**
**ते वेदाः सकलाभिनन्द्यविधयः प्रोद्यन्त नः सिद्धयः।।**

**सूत्राणि –**

संस्कृतभाषायां गृहसूत्राणिः, ब्रह्मसूत्राणि, श्रौतसूत्राणि, धर्मसूत्राणि, शूल्वसूत्राणि अन्यान्यानि च न्यायव्याकरणादिसूत्राणि संरचितानि सन्ति। इयं सूत्रनिर्माणविद्या एव अस्माकं संस्कृतभाषायाः अपूर्वनिधिः वर्तते तत्समक्षं पाश्चात्याः आपादमस्तकं नतमानाः सन्ति। बहुविस्तृतार्थस्य प्रकाशनं स्वल्पैरक्षरैः कथनम् अस्याः भाषायाः वैशिष्ट्यं वर्तते। सकलभूमण्डलस्य भाषावैज्ञानिकाः अस्यैव वैशिष्टस्य समक्षम् आपादमस्तकं नतमानाः सन्ति। अस्मिन् विषये उदाहरणं वर्तते यत् यथा पाणिनिव्याकरणस्य सूत्रं 'अदसोऽसेदादुर्दोमः' अत्र अष्टौ अक्षराणि षट्पदानि सन्ति, अत्र सूत्रस्थार्थो भवति यत् यस्मिन् अदस् शब्दे सकारः अन्ते न भवति तत्र दकारस्य अग्रे ह्रस्वाक्षरस्य ह्रस्व उकारः दीर्घस्य स्थाने दीर्घः ऊकारो भवति किंच दकारस्य स्थाने मकारो भवति 'एतावान् अर्थः एभ्यः षड़भ्योऽक्षरेभ्यो निःसरति। 'ऊकालोज्झस्वदीर्घप्लुतः' उश्च ऊश्च ऊ३श्च वां काल इव कालो यस्य क्रमाद् सोऽच् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् इत्यर्थो वर्तते सूत्रस्य। एवम्प्रकारेण सूत्रात्मकशैल्यां लिखितोऽयं व्याकरणग्रन्थः बहुविस्तृतं ज्ञानं प्रकाशयति भाषां परिष्करोति च। अत्र इदमवधेयं यत् एषु सूत्रेषु पूर्वसूत्रेभ्यः कानिचित् पदानि आकृष्यन्ति 'सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र। भाषान्तरे एवं विधं वाक्यचमत्कारिता न दृश्यते। वयं तु **'अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः'** इति मार्गस्यानुसरिणः। किं बहुना गुणग्राहिणः पाश्चात्यपण्डिताः सुबहुतरं प्रशंसन्ति स्वल्पैरक्षरेर्बह्वर्थप्रतिपादनकलामस्माकम्।

**स्मृतयः –**

मनुः याज्ञवल्क्य–पाराशर–अत्रि–हारीतादि प्राचीनमहर्षीणां सर्वस्मिन् जगति यत्किंचिदपि सभ्यतारूपेण पल्लवितं तत्सर्वं प्रकटयन्ति भारताद् बहिरावसन्तो विदेशीया अपि सश्रद्धमभिमन्यन्ते। पाश्चात्याः विद्वाँसः मनुस्मृतेः आवश्यकान् अंशान् स्वीकृत्य उपदेशान् स्वभाषायामनूद्य सभ्यतासंदर्भे प्रचारयन्ति। स्मृत्युपासकाः वयं **"वसुधैव कुटुम्बकम्"** इति भावनया जीवमानः जीवनसंग्रामे स्वाभीष्टं साधयामः। पाश्चात्याः संसारस्य प्रवृत्तिसाधारणधर्ममाहुः किन्तु अस्माकं धर्मशास्त्राण्युपदिशन्ति "यथा मानवः स्वयं स्वस्य जीवनं स्वार्थं च निजाऽभीष्टं भावयति तथा अन्यस्यापि जीवनं स्वार्थं च तदभीष्टं भावयन् कस्याप्यनिष्टं न भावयेत् न च तथाऽनुतिष्ठेत्। स्वयं जीवेत अन्यांश्च जीवयेत् इति आर्यमानवस्य जीवनसारः। के के सामान्यधर्माः के के विशिष्टधर्माः इति स्मृतिग्रन्थैः उपदिष्टः तदेव संसारव्यवहारमार्गः। सामान्यरूपेण एव उक्तं यत् मानवः अन्येषां गमने विघ्नं नोद्भावयेत्। कदाचित् अवसरः प्राप्यते तदा मार्गादपसृत्य अन्येभ्यों मार्गाऽवकाशं दद्यात् "पन्थाः देयश्च भारिणः' इति। एवं सकलसंसारस्य कर्त्तव्योपदेशिकाः स्मृतयः संस्कृतभाषासाहित्यमेव अलंकुर्वन्ति।

**उक्तम् –** **एतद्देश प्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।**

**दर्शनानि –**

दृश् धातोः ल्युट्–प्रत्यये कृते दर्शन शब्दो निष्पद्यते। दृश्यते अनेन इति दर्शनम्। येन माध्यमेन इदं विश्वं वस्तुजातम्, ब्रह्म, जीवात्मा प्रकृतिश्च विविच्यते तद् दर्शनम्। अतः आध्यात्मिकं आधिभौतिकं च विवेचनमेव दर्शनम्। ब्रह्मणः स्वरूपं किम् ? ईश्वरः कः ? आत्मनः किं स्वरूपम्। आत्मनः परमात्मनः कः सम्बन्धः जीवस्य कुत उद्भूतिः ? चेतनाचेतनयोः भेदः ? किं लिंगशरीरम् इत्यादि विषयाणां यत्र विवेचनं तद् दर्शनम् ।

**यथा–**

**केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः।**
**केनेषितां वाचमिमां वदन्ति, चक्षु श्रोत्र कउ देवो युनक्ति।।**

एवं प्रकारेण समस्ते भुवने पाश्चात्याः पौरस्त्याश्च विपश्चितो भारतीयदर्शनं मुक्तकण्ठेन प्रशंसन्ति। भारतीयदर्शनानां महत्वविषये न कुत्रापि विप्रतिपत्तिः। यानि दर्शनशास्त्राणि अस्माकं जीवनपद्धतेः

उन्नयनस्य प्रमाणत्वेन सन्ति, अस्माकं जातिः अति प्राचीनतमेऽपि काले सुसभ्या सुसमुन्नता च आसीत् इति स्पष्टयन्ति। तानि दर्शनशास्त्राणि सेयमस्माकं संस्कृतैव वाणी जनयामास। यूरोपीयाः प्राचीनाः दार्शनिकाः आत्मनः देशे दर्शनरहस्यं प्रचार्य अस्माकं दर्शनशास्त्रस्य ऋणिनः सन्ति। लैथब्रज महाशयः स्वरचिते इतिहासग्रन्थे हिन्दूनां विषये यद्यपि संकीर्णान् विचारान् प्रकटितवान् परं तस्यापि मुखादिदमेव निःसृतं यत्– दर्शनशास्त्रस्याऽऽदिगुरवः केवलमार्या एव सन्ति। एवं प्रशंसाभाजनानि दर्शनशास्त्राणि अस्याः संस्कृतभाषाया एव गौरवं घोषयन्ति।

**ज्योतिष शास्त्रम् –**

आकाशमण्डलस्य सम्पूर्णं वृत्तान्तं अनया एव भाषया उद्घाटितम्। खगोलविद्यामवलम्बय पाश्चात्यैः साम्प्रतिमतिशयितोन्नतिः प्रदर्शिता सा विद्या संस्कृतभाषायामेव निहिता संसारस्याग्रे स्थापिता च। चीनदेशे अरबदेशे च ज्योतिषविद्यायाः यानि कान्यपि तथ्यानि उपलब्धानि सन्ति तानि सर्वाण्येव संस्कृतभाषाऽग्रलब्धानि सन्ति इति अन्वेषकाः स्वीकुर्वन्ति। भारतवर्षस्य अंकगणितं समग्रेऽपि संसारे संस्कृतभाषामेव सर्वतः प्रथममाविरासीत्। पाश्चात्य पण्डितः एलबरूनी निजभिप्रायं प्रकाशयति' मया अनेकभाषासम्बन्धिनाम् अंकानां नामानि शिक्षितानि परन्तु कस्यामपि भाषायां सहस्रसंख्यातोऽग्रेतनीनां संख्यानां नामानि नाऽवाप्तानि। परन्तु संस्कृतभाषायामष्टादशांऽकानां संख्यानामपि नामानि सन्ति। अष्टादशतमाया अन्तिमसंख्यायाः परार्द्धं तेषां नाम। अरबदेशीयाः गणितविद्यां हिन्दुभ्यः एव शिक्षिताः ते इमां विद्यां 'इल्महिन्दसा' अर्थात् भारतवर्षीया विद्या इति वदन्ति। अत एव सुस्पष्टं प्रमाणं त्विदमेवाऽस्ति यद्यद्यावधि आरब्याः पारसीकाश्च अंकान् हिन्दसा इति नाम्ना व्यवहरन्ति। एलजेब्रा इति नाम्ना व्यवहृता बीजगणितं संस्कृतभाषासिन्धुसमुत्थितमेकं रत्नम् अस्ति। रेखागणिते यानि उपलब्धानि शूल्वसूत्राणि सन्ति तानि अस्यामेव भाषायां प्रसूतान्यभूवन्। विलियम्स महाभागेनोक्तम् 'बीजगणितस्य तथा रेखागणितस्य चाऽविष्कारः ज्योतिषशास्त्रेण सह तस्य प्रथमप्रयोगः हिन्दूनामेव द्वारेणाऽभूत्।' अखिल संसारः रेखागणितस्य कृते भारतवर्षस्य एव ऋणी वर्तते।

**नाट्यम् –**

संस्कृतनाटकं संसारे प्रख्यातं वर्तते। भारतीया कला न केवलं मनोरञ्जनाय अपितु आत्मा परमानन्दं विन्दति। यथोक्तम्

**विश्रान्तिर्यस्य सम्भोगे सा कला न कला मता।**
**लीयते परमानन्दे ययात्मा सा परा कला।।**

नाटके सर्वाः कलाः सर्वाः विद्याः सर्वाणि शास्त्राणि सर्वाणि शिल्पानि सर्वे योगाः सर्वाणि च कर्माणि निहितानि सन्ति। नाटके सर्वाःकलाः सर्वाःविद्याः सर्वाणि शास्त्राणि, सर्वाणि शिल्पानि, सर्वे योगाः सर्वाणि च कर्माणि निहितानि सन्ति। यथा भरतमुनिना उक्तम् –

**न तज्ज्ञानां न तच्छिल्पं न सा विद्या न सा कला।**

**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।**

नाट्यशास्त्रमुद्दिश्य भरतमुनिना कृतं नाट्यशास्त्रम् संस्कृतभाषामेव रचितम्। नाट्यस्य प्रचारबाहुल्येन प्राचीनभारते नाटकनिर्माणस्य भूयान् प्रचारः भूयसी च प्रतिष्ठाऽसीत्। भारते पुरा बाहुल्यमभूद रंगमञ्चानाम्। नाटक–प्रकरण–सटट्क– भाण'प्रहसनादीनि अनेकानि रूपकाणि निरमीयन्ते तेषु तेषु प्रान्तेषु। नाट्यविषयस्य रंगमञ्चोपरि अभिनेतारः तन्नियमनिर्मातारोऽप्यनेके समर्थाः पण्डिता अभूवन् येषामनेके सम्प्रदाया प्रावर्तन्त नाट्यविषये।

**आयुर्वेदशास्त्रम् –**

भारतीय आयुर्वेदशास्त्रस्य अद्यापि समग्रेऽपि भूमण्डले अतुलनीयं गौरवं वर्तते। तत् आयुर्वेदशास्त्रं संस्कृतभाषायामेव निहितम्। त्रिदोषपद्धतिः (वात–पित्त–कफान्यवलम्ब्य चिकित्साऽरम्भः) या हि भारतीयचिकित्सा प्रणाल्या मूलाधारः। वैदेशिकचिकित्सकैः एतस्याः पद्धतेः ऊपरि नानाशंका कृताः अनेके तर्काश्चोत्थापिताः किन्तु भारतीयचिकित्साशास्त्रज्ञैः आयुर्वेदशास्त्रे तेषां सर्वेषां शंकानां प्रत्यक्षपरीक्षाद्वारा समूलं शमनं कृतम्। सेयं चिकित्सा पद्धतिः आयुर्वेदविज्ञानम् इति संस्कृतभारतीमिमभिमण्डयतीति।

**नीतिशास्त्रम् –**

भारतस्य महत्वपूर्णरत्नमिदं नीतिशास्त्रम्। नीति निपुणाः वयं भारतीयाः सामाजिकरूपेण समृद्धाः राष्ट्रस्योन्नतिसम्पोषकाः समग्रभूमण्डले स्वकीयां संस्कृतिं उच्चैः स्थापयामः। कौटिलीयमर्थशास्त्रं यत् संस्कृतभाषायामेव निबद्धं वर्तते तस्य गुणगौरवं अभिशंसन्तः पाश्चात्याः वदन्ति यत् यस्मिन् काले तदिदमर्थशास्त्रं निर्मितमभूत्। तस्मिन् समये अन्येषु देशेषु एतादृशी सभ्यता एव नासीत्। महामहागभीरं दर्शनीयविषयमारभ्य भोजननिर्माणम्, गृहनिर्माणम्, इत्यादिव्यावहारिक विषयपर्यन्तं सर्वेष्वेव विषयेषु संस्कृतभाषायां शताधिकं ग्रन्थाः सन्ति। भर्तृहरिमहोदयस्य नीतिशतकम् पुस्तकं तु अस्मान् सामाजिकजनान् जीवनव्यवहारविषये सुविस्तृतरूपेण उपदिशति तत्र जीवनमूल्यानां प्रतिकोणस्य बहूनि उद्धरणानि सन्ति।

**काव्यानि –**

काव्यविषये कविताग्रन्थाः यावन्मात्रायां संस्कृतभाषायां रचिताः सन्ति न अन्यास्यां कस्यामपि अपरस्यां भाषायाम्। अस्यां भाषायां यादृशानि उत्तमकाव्यानि कविभिः लिखितानि सन्ति तेषां साम्यं अद्यापि देशान्तरेषु न प्राप्तुं शक्यते। तत्र समग्रेऽपि भूमण्डले कानिचित् प्रसिद्धानि सन्ति तेषां नामोल्लेखमात्र क्रियते। **यथा–**

**कालिदासः**

1. नाट्यग्रन्थाः – अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम्।
2. काव्यद्वमय् – रधुवंशम्, कुमारसंभवम्।
3. गीतिकाव्यद्वयम् – मेघदूतम्, ऋतुसंहारम्। को वा ईदृशः देशः वर्तते यत्र कालिदासस्य रसमयी वाणी नादृता भवेत् ? यदा कालिदासस्य सर्वस्वस्य अभिज्ञानशाकुन्तलस्य पाश्चात्येषु प्रचारः अभवत् तदा तैरभिज्ञातम्– अहो भारतीयाः नाटकलेखप्रणाल्यां कीदृशाः पारगामिनोऽभूवन् इति।

**महाकविः भारविः – किरातार्जुनीयम्**

एतस्मिन् विषये मल्लिनाथेन उक्तम् –

**नारिकेलफलसंमितं वचो भारवेः सपदि तद् विभज्यते।**
**स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम्।**

**कविः दण्डी – काव्यादर्शः, दशकुमारचरितम् च।**

1. कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः।
2. त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः।

**महाकविः माघः – शिशुपालवधम्**

**उपमाकालिदासस्य भारवेर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।**

**श्रीहर्षः– नैषधीयचरितम्**

**तावद् भा भारवेर्भाति यावन्माघस्य नोदयः।**

**उदिते नैषधे काव्ये क्व माघः क्व च भारविः।**

**श्रीभवभूतिः – उत्तररामचरितम्।**

**भवभूतेः कवीन्द्रस्य वाणी कामदुघा मता।**
**बह्मनन्दसहोदर्या या तनोति मुदं सदा।**

**बाणः – हर्षचरितम्, कादम्बरी च।**

रूचिर स्वरर्ण पदा रसभावती जगन्मनोहरति।
सा किं तरूणी ? नहि नहिं वाणी बाणस्य मधुरशीलस्य।।
हर्षो हर्षो हृदयवसतिः पंचबाणस्तु वाणः।
केषां नैषा कथय, कविता कामिनी कौतुकाय।।

**भासः –** **प्रतिज्ञायौगन्धरोयणम, स्वप्नवासवदत्तम्।**
ऊरूभंगम्, दूतवाक्यम्, पंचरात्रम्, बालचरितम्, दूतघटोत्कचम्,
कर्णभारम्, मध्यमव्यायोगः, प्रतिमानाटकम् अभिषेकनाटकम्
अविमारकम्, चारूदत्तम्।

**भासो हासः सरस्वत्या नाटकैरमृतोपमैः।**
**नाट्यवाङ्मययोमेन्दुः शास्त्रज्योतिर्विभास्वरः।**

संस्कृतभाषायां कवितायाः तावान् आदरोऽस्ति यावान् अन्यासु भाषासु नाऽवलोक्यते गवेषणेनाऽपि। एवमस्याः संस्कृतभाषायाः सुविस्तृतमस्ति साहित्यक्षेत्रम्। जगतितले ईदृशः कोऽप्यावश्यको विषयो नास्ति यस्य ग्रन्थाः संस्कृत भाषायां नोपलभ्येरन्। अत्र बहुवारं ग्रन्थरत्नानां लुण्ठने ध्वंसने भूतेऽपि यावन्तः काव्यग्रन्थाः अवशिष्टाः सन्ति तावन्तः एव अस्याः भाषायाः गौरवं प्रमाणयितुं समर्थाः सन्ति।

**सन्दर्भग्रन्थसूची –**


1. वैदिकसाहित्यस्येतिहासः
2. संस्कृतसाहित्यस्येतिहासः

3. संस्कृतनिबन्धशतकम्
4. गीर्वाणगिरागौरवम्
5. वैयाकरणसिद्धान्तकौमुदी
6. महाभाष्यम्
7. मनुस्मृतिः
8. नाट्यशास्त्रम्

**(इति शिवम्)**

Copyright@ijaer.org 